RNI No. : DELSAN/2011/38660 ISSN 2321-4937 DL(E)-20/5534/2018-20
Approved Journal by UGC - No 40484
सत्यमेव जयते


|| ओ३म् ||
प्राय: कन्दुकपातेनोत्पतत्यार्य:
पतन्नपि।
तथा पतत्यनार्यस्तु
मृत्पिण्डपतनं तथा। ॥४॥
लभेत सिकतासु तैलमपि यत्नत: पीडयन्
पिबेच्च मृगतृष्णिकासु सलिलं पिपासार्दित:।
कदाचिदपि पर्यटञ्छशविषाणमासादयेत्
न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत्॥५॥
(नीतिशतकम्)

# संस्कृत – संवादः

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालयः ए-२/१२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाष: ९३११०८६७५१
ई-मेल: sanskritsamvad@gmail.com वेबसाइट: www.sanskritsamvad.com मूल्यम्-रू. ५/-

|| ओ३म् ||
व्यालं बालमृणालतन्तुभिरसौ रोद्धुं
समुज्जृम्भते,
छेत्तुं वज्रमणीं शिरीषकुसुमप्रान्तेन
सन्नह्यति।
माधुर्यं मधुबिन्दुना रचयितुं क्षारामुधेरीहते
नेतुं वाञ्छति य:
खलान्पथि सतां सूक्तै:
सुधास्यन्दिभि:॥६॥
(नीतिशतकम्)

वर्षम्-८ अंक:-२० (१८८) १६ अप्रैल: २०१९ त: ३० अप्रैलमास: २०१९ पर्यन्तम् विक्रमसंवत्-२०७६ सृष्टिसंवत्-१,९६,०८,५३,११७ पृष्ठम्-८

## वर्तमानपरिप्रेक्ष्ये श्रीमद्भगवतगीतायाः व्यावहारिकी उपयोगिता

-डॉ. कामनाविमलशर्मा

नवदेहली: वैश्विकस्तरेभारतीयज्ञानसम्प्रदाय:महत्त्वंप्रस्थापयितुंवृहत्तर-वैदिक-अध्ययन-परिषदा (वेव्स) वर्षे:ऽस्मिन्समायोजितायांपरिचर्चा- श्रृंखलायांप्रथमावेदीयपरिचर्चासम्पन्नाश्रीमहाविद्यालये- अभवत्, द्वितीयाश्चअप्नानसमसामयिकीपरिचर्चासमापनस्य सर्वविषयोचितम्देवांके- श्रीमद्भगवतगीतायाः व्यावहारिकीउपयोगितावर्तमानापेक्षा:इतिविषयमधि- पूर्वदिल्लीविश्वविद्यालयस्यवडारी- परिसरेस्थितेगांधीभवनस्यसभागारेसमायोजिता।




कार्यक्रमस्यास्यसंचालनंदिल्लीविश्वविद्यालयस्यसंस्कृत-विभागस्यएसोसिएटप्रोफेसरडॉ. रणजीतबेहेरामहोदयेनकृतम्। प्रो. भूदेवशर्मा, संस्थापकाध्यक्ष:, वेव्स (अमेरिका) अस्यायोजनस्य अध्यक्षपदमलंकृतवान्। अमरीकादेशस्यओहायोविश्वविद्यालयस्य- इंजीनियरिंगसंकायस्यप्रो. शिवचतुर्वेदीकार्यक्रमस्यमुख्यवक्तारूपेणविराजित:। परिचर्चाया:मुख्यवक्ता: - सुप्रसिद्धवेदविदुषी, दिल्लीविश्वविद्यालयस्यमैत्रेयीमहाविद्यालयस्यपूर्वाचार्याडॉ.शशितिवारीमहोदया; नेपालदेशत:समागत:संहिताशास्त्रीउपाधिनासम्मानित:डॉ. अर्जुनप्रसादबस्तोलामहोदय:, दिल्लीविश्वविद्यालयस्यसंस्कृतविभागस्यपूर्वाध्यक्ष: गाँधीभवनस्यनिदेशकश्चडॉ. रमेशभारद्वाजमहोदय:, दिल्लीविश्वविद्यालयस्यसंस्कृतविभागस्यैवएसोसिएटप्रोफेसरडॉ. भारतेन्दुपाण्डेयमहोदय:, दिल्लीविश्वविद्यालयस्यलक्ष्मीबाईमहाविद्यालयस्यसंस्कृतविभागस्यपूर्वाचार्याडॉ. धर्मशर्मा, डॉ. राजेन्द्रकुमारपांडे, लेखक:पूर्वअपरपुलिस, गाजियाबाद: चावर्तन्त।

स्वागतस्वरस्परार्थसर्वप्रथमंश्रीपरमानन्दमहोदयेनवैदिकमंगलाचरणंकृतम्, गाँधीमहोदयस्यप्रतिमांप्रतिपुष्पार्पणंकृतम्अतिथिभि:, तदनन्तरमतिथीनाञ्चस्वागतंडॉ. रणजीतबेहेरामहोदयेनपुष्पमालाभि: चअभिहितम्।

विषयप्रवर्तनस्वरेडॉ.शशितिवारीमहोदययागीतायांवर्णितस्यधर्मशब्दस्यतात्विकव्याख्याअपेक्षिता वर्तमानयुगे- इतिउद्घोषितम्। तदनन्तरं, सभायांमुख्यवक्तारूपेणविराजितेनप्रो. शिवचतुर्वेदीमहोदयेनगीतायांवर्णितानांपारिभाषिकशब्दानां-विषाद:, सङ्ग-असङ्ग-कुसङ्ग-सत्सङ्ग:, विद्या-अविद्या, इत्यादीनांवैज्ञानिकव्यावहारिकश्चचिन्तनंप्रस्तुतम्। वैज्ञानिकै: वेदगीतास्वअवगमेवज्ञातव्येइत्युद्घोषितम्महोदयेन। स्वधर्मेमहोदय: रोबर्टओपेनहीमर, रोबर्टमिलर,

शेषभाग:द्वितीयपृष्ठे

## परशुरामविक्रममिति संस्कृतमहाकाव्यस्य अर्वाचीनसंस्कृताङ्कस्य च लोकार्पणम्

नवदेहली। प्रो.सुधीकान्तभारद्वाज 'कल्प' विरचितस्य परशुरामविक्रममिति संस्कृतमहाकाव्यस्य लोकार्पणं देववाणी-परिषदस्तत्त्वावधाने षट्सप्तत्युत्तरद्विसहस्रतमे विक्रमाब्दे तदनुसारं एकोनविंशत्युत्तरद्विसहस्रतमे ख्रिष्टाब्दे, अप्रैलमासस्य पञ्चदशतारिकायां मुख्यातिथिभि: राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिपदमलंकुर्वाणै: प्रो.परमेश्वरनारायणशास्त्रिमहाभागै: राष्ट्रियसंस्कृतसंस्थानस्य सभागारे लोकार्पणं कृतम्। अस्य समारोहस्याध्यक्षता परिषदध्यक्षै:




पद्मश्रीविभूषितै: डा.रमाकान्तशुक्लमहाभागैर्निव्यूढा।

ग्रन्थप्रणेतृभि: प्रो.सुधीकान्तभारद्वाजमहोदयैर्महाकाव्यस्य परिचयो दत्त:। तैरुक्तं यत्काव्यमिदं एकविंशतिसर्गात्मकमस्ति। संक्षेपेण परशुरामस्यैकविंशतियुद्धै: संबद्धो। परशुरामो भारतीयपरम्परायां विष्णोरवतारेषु विशिष्टं स्थानं भजते। भारतवर्षस्यैकराष्ट्ररूपेण संस्थापना तेनैव कृता। तेनैकविंशतिवारं युद्धं कृत्वा दुष्टशासकानां संहारो लोकोपकारायैव कृतो न स्वात्मवैमनस्येन। तैरिदमपि सूचितं यदस्मिन् काव्ये परम्पराया निर्वाह: पूर्णतया कृत:। केवलं घटनानामैतिहासिकपूर्णसंयोजनायैव कल्पनाया आश्रयो गृहीत:। अत्र परशुरामरूपेण विष्णोरवतारेण सह पद्मेश्वरीरूपेण लक्ष्म्या अवतारोऽपि कल्पित:। यदा विष्णोरवतारेऽत्र ब्रह्मचारिरूपेण वर्तते तदा तस्य सहचार्या लक्ष्म्या अवतारोऽपि ब्रह्मचारिणीरूपेण वर्तते।

मुख्यातिथिभि: प्रो. परमेश्वरनारायणशास्त्रिमहाभागैरेवं: प्रशंसितं

यदाधुनिककालेऽपि संस्कृतभाषायां महाकाव्यलेखनस्य परम्परा सुतरां जीवति। यदान्यासु भाषासु महाकाव्यलेखनस्य परम्परा लुप्तप्रायाऽन्यैयवी वा विद्यते, संस्कृतभाषायां महाकाव्यानि साम्प्रतमपि विरच्यन्त इति महदाश्चर्यजनकमस्ति। तै: परशुरामविक्रममहाकाव्यस्य कौतूहलकारकेषु प्रासंगिकतया: टिप्पण्य: कृता:।

डा. रमाकान्तशुक्लमहाभागैरध्यक्षीये भाषणे स्पष्टीकृतं यत्काव्येऽस्मिन् लक्ष्म्या अवताररूपेण पद्मेश्वरीपात्रस्य कल्पना सर्वथैवौचित्यपूर्णास्ति यत: नारीं विना पुरुषस्य समग्रतास्ति। लक्ष्मीनिर्मितो:

शेषभाग:द्वितीयपृष्ठे

## महामहिमराष्ट्रपतिमहोदयेन पुरस्कृता विद्वांसो राष्ट्रपतिभवने सत्कृताः

नवदेहली। भारतस्य उपराष्ट्रपतिमहोदयेन एस.वैंकय्यानायडुना वर्ष 2016-17-18 संस्कृत-पालि-प्राकृत-अरबी-फारसी-कन्नड-तेलगू-मलयालम भाषाणां 104 विद्वदन्ना: सम्मानित:। विदितोऽस्ति यत् मानवसंसाधनविकासमंत्रालय: प्रतिवर्षं पञ्चदश संस्कृतविद्वांस एवं अन्या: भाषाया: विद्वान्सं राष्ट्रपति सम्मानप्रमाणपत्रमेवं बादरायणव्याससम्मानं प्रदीयते। अस्य घोषणा राष्ट्रपति प्रतिवर्षं स्वतंत्रतादिवस्य पूर्व संध्यायां करोति।



